नं.१२

योगसूत्र वृत्ति: राजमार्तण्ड:

स्टीनं नं ४३८४

पा॰ सू॰ ॐ श्रीगणेशायनमः गणपतिचरणाभ्यांनमः दे
१ हार्द्धयोगः शिवयोः सम्भो[illegible]नितोद्भवः दुःप्रापम
पिघन्स्मृत्या[illegible]ते १ त्रिविधान्यपि
दुःखानिपदनुस्म[illegible] प्रयांतिसद्योविलयं
तंस्तुमः शिवमव्य[illegible]लिमुनिरफणिः काप्या
पूर्व्वाजपत्यसौ पुं[illegible]पि योग इत्युदि
तोयया २ जयंतिवा[illegible]नुरान्तरस्फुरत्तमः
स्तोमविनाशकृद्विषः [illegible]प्रमाताः सन्ततंमनाः
स्थियाः सत्तांसदानंदमय[illegible]तेकुर्वन्ते ४ शब्दानामनु
शासनंविदधतापातं[illegible]लि कुर्वता हृतिराजमृगांकसं
ज्ञमपिचव्यातन्वता वैद्यकं वाक्चेतोवपुषांमलःफ
णाभृतांभर्त्रेवयेनोद्धृतस्तस्यश्रीरणमल्लरंगनृपते
र्व्वाचोजयंत्युज्ज्वलाः ५ उत्सृज्जाक्लिष्टरमुदस्यविकल्प

जालंफलत्युभवकामभवधार्यवसम्यगर्थानत्र श्रा
वेपतंजलिमतेविवृतिर्मयेयमातन्यतेबुधजनप्रति
बोधहेतुः ६ अथयोगानुशासनं अनेनसूत्रेणास्य
शास्त्रस्यसंबंधाभि[illegible]प्रयोजनान्याख्यायंते अ
थशब्दोधिकारद्योत[illegible]र्थमंगलार्थश्च युक्तिर्यो
गःसमाधानं अनुशि[illegible]व्याख्यायते लक्षणभे
दोपायैर्यनेनतदनु[illegible]शासनं तदाशा
स्त्रपरिसमाप्तेरधि[illegible]धिकृतंबोद्धव्यः तत्रशा
स्त्रस्यव्युत्पाद्यतया[illegible]नः सफलोभिधेयः
तदुत्पादनंच[illegible]तस्यचयोगस्यकै
वल्यफलं शास्त्रा[illegible]तिपाद्यप्रतिपादक
भावलक्षणः संबंधः अ[illegible]यस्ययोगस्यतत्फलस्य
चकैवल्यस्यसाध्यसाधनभावःशास्त्रेणप्रदर्श्यते म

पा॰वृ॰ त्साधनसिद्धोयोगः कैवल्याख्यफलमुत्पादयति तत्रको
२ योगइत्याह योगश्चित्तवृ[illegible]रोधः चित्तस्यनिर्मलस
त्वपरिणामरूपस्य[illegible]गिभावपरिणामरूपा
स्तासांनिरोधोव[illegible]त्तिविच्छेदात्तत्संस्कार
याप्रतिलोमपरिणा[illegible]शीलयोयोगइत्याख्या
यते सवानिरोध[illegible]र्वप्राणिनां
धर्मः कदाचित्कस्य[illegible]वर्भवति तत्स्वादित
मूढंविक्षिप्तमेकाग्रं[illegible]वः [illegible]ते चित्तस्यभूमयःचित्त
स्यावस्थाविशेषाः मूढ[illegible]दोष्णरजसउद्रेकादस्थिरं बहिर्मु
तयासुखदुःखादिविषयेषुकल्पितेषुसन्निहितेषु
वारजसाप्रेरितं तच्चसदेवदैत्यदानवादीनां मूढंतम
सउद्रेकात्कृत्याकृत्यविभागमगणयत् क्रोधादिभि
र्विरुद्धकृत्येष्वेवनियमितं तच्चसदेवरक्षःपिशाचादी

नां विक्षिप्तंतुसत्वोद्रेकाद्वैशिष्ट्येनपरिहत्यदुःखसा
धनंसुखसाधनेष्वेवशब्दादिषुप्रवृत्तंतत्त्वसदैवदेवा
नां एतदुक्तंभवति रजसाप्रवृत्तिरूपं तमसापराप
कार नरत्न सपि, सुख[illegible]पा -- एतासतिसाक्षिप्ता
वस्थानसमाधावुपयोगि[illegible] एकाग्रनिरुद्धरूपेतुस
त्वोत्कर्षाद्यथोत्तरमवस्थि[illegible]तसमाधावुपयोगम
जेते सत्वादिक्रमवुत्[illegible]ः द्वयोरपिर
जस्तमसोरत्यंतहेता[illegible]परजसः प्रथममुपा
दानं यावन्नप्रवृत्तिर्दर्शिता तावन्निवृत्तिर्नशक्यते
दर्शयितुमिति द्वयोर्व्यत्ययेन प्रदर्शनं सत्वस्यत्वेन
दर्व्यपश्चात्प्रदर्शनं यतः सात्विकवैराग्यउत्तरे द्वेभूमीयो
गोपयोगिन्याविति तत्रत्तयोर्द्वयोरेकाग्रनिरुद्धयो
र्भूमिकयोर्यश्चित्तस्यैकाग्रतारूपः परिणामः सयोगः

पा॰ वृ॰ किमुक्तं भवति एकाग्रे बहिर्वृत्तिनिरोधः निरुद्धे च
२ सर्वासां वृत्तीनां संस्का[illegible]राणां प्रविलयः इत्यनयो
रेव भूम्योर्योगस्य संभवः इदानीं सूत्रकारश्चित्तवृ
त्तिनिरोधपदानि व्याख्यातुकामः प्रथमं चित्तपदं व्या
ख्यातुं वित्तौ धीतं म[illegible]दयं व्याचष्टे त
दा द्रष्टुः स्वरूपेवस्थान[illegible]स्मिन्काले
स्वरूपे चिन्मात्रस्वरूप[illegible]स्थानं स्थितिर्भवति
इत्यत्र अयमर्थः विवेकख्या[illegible]संक्रमाभावात्कर्तृ
त्वाभिमाननिवृत्तौ प्रो[illegible]परिणामायां बुद्धावात्म
नः स्वरूपे वस्थानं [illegible]र्भवति व्युत्थानदशायां
तस्या किं रूपमित्याह वृत्तिसारूप्यमितरत्र इतरत्र
योगादन्यस्मिन्काले वृत्तयो वक्ष्यमाणा लक्षणाः ताभि सिः
सारूप्यं तद्रूपत्वं अयमर्थः यादृश्यो वृत्तयः सुखदुः

खमोहात्मिका प्रादुर्भवन्ति तादृग्रूप एव संवेद्य
ते व्यवहर्तृभिः पुरुषः न देवयास्मिन्नेकाग्रता परिणा
मो चितिशक्तेः स्वरू[illegible]प्रतिष्ठानं भवति यस्मिंश्च बुद्धि
वृत्ति[illegible]विषया[illegible]रपरिणामे पुरुषस्तदाका
र एव परिभाव्यते यथा जले[illegible]रंगेषु चलत्सु चंद्रश्चलति
वत्प्रतिभासते ताश्चित्त[illegible]व्याख्यातुमाह वृत्तयः
पंचत[illegible]ः क्लिष्टाः अक्लि[illegible]चित्तस्य परिणाम
विशेषाः वृत्तिसमुदा[illegible]स्यावयविनो याव
यवभूतास्तत्तयस्तदपेक्षया तयप्प्रत्ययः एतदुक्तं भव
ति पंचवृत्तयः कीदृश्यः क्लिष्टाः क्लेशैर्वक्ष्यमाणैराक्रां
ताः क्लिष्टास्तद्विपरीता अक्लिष्टाः ता एव पंचवृत्तयः
सामुद्दिश्य व्याख्यायन्ते प्रमाणविपर्ययविकल्पनि
द्रास्मृतयः आसां क्रमेण लक्षणमाह प्रत्यक्षानुमा

ल

पा.२. ४

नागमाः प्रमाणानि अत्रान्तर्भासित्वान्नप्रमाणा-
नांशास्त्रकारेणाभेदान्निरूपणेनैव गतत्वाल्लक्षण-
स्यन पृथक्कृतलक्षणं [...]नं प्रमाणलक्षणं अविसं-
वादि ज्ञानं प्रमाणमिति इंद्रियद्वारेण बाह्यवस्तूपरागाच्चित्त-
स्य तद्विषया सामान्या[...]त्मनोऽर्थस्य विशेषावधा-
रणप्रधाना वृत्तिः प्र[...]लिंगाल्लिंगिनि
सामान्यात्मनाऽध्यवसा[...]न आप्तवचनमागमः
एवं प्रमाणरूपां वृत्तिं व्याख्या[...]थ विपर्ययरूपामाह
विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठं अतथाभूतेऽर्थे
तथोत्पद्यमानं ज्ञानं विपर्ययः यथा शुक्तिकायां रज-
तज्ञानं अतद्रूपप्रतिष्ठमिति तस्यार्थस्य यद्रूपं तस्मिन्
रूपेन प्रतिष्ठितमिति तस्यार्थस्य यत्पारमार्थिकं रू-
पं न तत्प्रतिभासयतीति यावत् संशयोऽप्यतद्रूप-

प्रतिष्ठत्वान्मिथ्याज्ञानं यथा स्थाणुर्वा पुरुषो वेति
विकल्पवृत्तिं व्याख्यातुमाह शब्दज्ञानानुपाती वस्तु-
शून्यो विकल्पः शब्दजनितं ज्ञानमनुपतातितच्छीलः
शब्दज्ञानानुपाती व[...]तत्त्वात्वमनपेक्षमाणो
योऽध्यवसायः स विकल्प इ[...]च्यते यथा पुरुषस्य चैत-
न्यं स्वरूपमिति अत्र देवद[...] कंबल इति वत् शब्द-
जनिते ज्ञाने षष्ठ्याऽयो ध्य[...]ः तमिहाविद्यमान-
मपि समारोप्य प्रवर्त[...]ायः वस्तुतस्तु चैतन्य-
मेव पुरुषः निद्रां व्या[...]ख्यातुमाह अभावप्रत्ययालं-
बना वृत्तिर्निद्रा अभावप्रत्ययः आलंबनं यस्याः वृत्तेः सा
तथोक्ता एतदुक्तं भवति या संततमुद्रिक्तत्वात्तम-
सः समस्तविषयपरित्यागेन प्रवर्तते वृत्तिः सा निद्रा
अस्याश्च सुखमहमस्वाप्समिति स्मृतिदर्शनात् स्म-

पा॰१ निश्चानुभवव्यतिरेकेणानुपपत्तेर्हेतुत्वं स्मृतिं व्या
५ ख्यानुमाह अनुभूतविषयासंप्रमोषः स्मृतिः प्रमा
णेनानुभूतस्य विषयस्य योयमसंप्रमोषः संस्कार
द्वारेणाबुद्धावुपरोहः सा स्मृतिः तदत्र प्रमाणविपर्य
यविकल्पजा यद्यथा [illegible] दनुभववला प्रमाणद्
प्रमाणजाः तत्र स्वप्नभू [illegible] र्थनियतस्त्वम
निद्रासंवेद्यमानवि [illegible] स्मृतिश्च प्रमाणावि
पर्ययविकल्पनिद्रानिमि [illegible] एवदूत्तीर्व्याख्यायसो
पायं निरोधं व्याख्यातु [illegible] मीह अभ्यासवैराग्याभ्यां त
न्निरोधः अभ्यासवैरा [illegible] ग्य वक्ष्यमाणलक्षणाभ्यां प
श्रीः प्रकाशप्रवृत्तिनियमरूपाणां चित्तवृत्तीनां यत्त
न्निरुन्नं स निरोधः किमुक्तं भवति तासां विनिवृत्तबा
ह्याभिनिवेशानामन्तर्मुखतया स्वकारण एव चित्ते

शक्तिरूपतयावस्थानं तत्र विषयदोषदर्शन
जेन वैराग्येण तद्वैमुख्यमुत्पाद्यते अभ्यासेन च
सुखजनकशान्तप्रवाहप्रदर्शनद्वारेण दृढस्थैर्यमुत्पा
द्यते इत्थं ताभ्यां भवति चित्तवृत्तीनां निरोधः अभ्या
सं व्याख्यातुमाह तत्र स्थितौ यत्नो भ्यासः वृत्तिर
हितस्य चित्तस्य स्वरूप [illegible] रिणामः स्थितिः त
स्यां यत्न उत्साहः पुनः [illegible] नचेतसि निवेश
नं अभ्यास इत्युच्यते [illegible] ाह स तु दीर्घ
कालनैरन्तर्यसत्का [illegible] दृढभूमिः बहुकालं नै
रन्तर्येणादरातिश [illegible] मानो दृढभूमिः स्थिरो
भवति दार्ढ्याय भवतीत्यर्थः वैराग्यलक्षणमाह दृष्टा
नुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यं द्वि
विधो विषयो दृष्टानुश्रविकश्च दृष्ट इहैवोपलभ्यमानः

६४

देव
पा॰ १ शब्दादिः लोकादावानुश्रविकः अनुश्रूयते गुरुमुखादि- दि॰
६ त्यनुश्रवो वेदः ततआगत आनुश्रविकः तयोर्द्वयोरपि
विषययोः परिणामविरसत्वदर्शनाद्विगतगर्द्धस्य या
वशीकारसंज्ञा ममैते वश्या नाहमेतेषां वश्य इति यो
यं विमर्शस्तद्वैराग्यमु [illegible] विशेषमाह तत्परं
पुरुषख्यातेर्गुणवै [illegible] ण्यं परं प्रकृष्टं प्र
थमं वैराग्यं विषयविष [illegible] णविषयं उत्प
न्नगुणपुरुषविवेकख्या [illegible] र्तद्भवति निरोधसमा
धेरत्यंतानुकूलत्वात् एवं योगस्य स्वरूपमुक्त्वा सं
प्रज्ञातासंप्रज्ञातरूपं भेदमाह वितर्कविचारानंदास्मि तेद,
ता रूपानुगमात्संप्रज्ञातः समाधिरिति शेषः स
म्यक्संशयविपर्ययरहितत्वेन प्रज्ञायते प्रक
र्षेण ज्ञायते भाव्यस्य रूपं येन स संप्रज्ञातः समाधिर्भा

वनाविशेषः स वितर्कादिभेदाच्चतुर्विधः सवितर्कः
सविचारः सानंदः सास्मितश्चेति भावना भा
व्यस्य विषयान्तरप [illegible] रिहारेण चेतसि पुनः पुनर्निवि
शनं भाव्यं च द्विविधम् [illegible] श्वरस्तत्वानि च तान्यपि द्वि दि॰
धा जडाजडभेदात् ज [illegible] डानि चतुर्विंशतिः अजडः
पुरुषः तत्र यदा महा [illegible] स्थूलानि विषय
त्वेनादाय पूर्वापरानुसं [illegible] संभेदेन यत्र
[illegible] दा [illegible] अस्मिन्नेवा
लंबने पूर्वापरानुसं [illegible] शून्यत्वेन यदा भा
वना प्रवर्तते तदा [illegible] तन्मात्रान्तःकरणल
क्षणं सूक्ष्मं विषयम [illegible] देशकालधर्मावच्छे
देन यदा भावना प्रवर्तते तदा सविचारः तस्मिन्नेवालं
बने देशकालधर्मावच्छेदं विना धर्मिमात्रावभासित्वे

पा.द. तभावनाक्रियमाणा निर्विचारेत्युच्यते एवंपर्यंतः
७ समाधिर्ग्राह्यसमापत्तिरिति व्यपदिश्यते यदा पुन
रजस्तमोलेशानुविद्धमंतःकरणसत्त्वं भाव्यते तदा गुण
भावाच्चित्तस्य सुखप्रकाशमयस्य सत्त्वस्य भाव्य
मानस्योद्रेकात्सानंद [illegible] उच्यते अस्मिन्नेव
समाधौ ये बद्धधृतयस्ते [illegible] प्रधानपुरुषरूपं न प
श्यंति ते विगतदेहाहंकार [illegible] त्वाद्विदेहशब्दवाच्याः इ
यं ग्रहणसमापत्तिः ततः [illegible] रजस्तमोलेशानभिभूतं स
त्त्वमा(लंबनीकृत्य या प्रवर्तते भावना तस्यां ग्राह्यस्य स
त्त्वस्य न्यग्भावाच्चितिशक्तेरुद्रेकात्सत्ताभावेव,(शे मात्र
षत्वेन समाधिः) शुद्धसत्त्वमालंबनीकृत्य या प्रवर्त्तते
ते भावना तस्यां ग्राह्यस्य सत्त्वस्य न्यग्भावाच्चितिश
क्तेरुद्रेकात्सत्तामात्रावशेषत्वेन समाधिः सास्मित

इत्युच्यते न चाहंकारास्मितयोरभेदः शंकनीयः
यतो यत्रांतःकरणमहमित्युल्लेखेन विषयान्वेद
ते सोऽहंकारः यत्रांतर्मुखतया प्रतिलोमपरिणा
मेन प्रकृतिलीने चेतसि सत्तामात्रमेव भाति सास्मि
ता अस्मिन्नेव समाधौ [illegible] कृततोषाः परं परमात्मानं
पुरुषं न पश्यंति तेषां चेतसि [illegible] स्वकारणे लयमुपगते
प्रकृतिलयाः [illegible] पुरुषं ज्ञात्वा भावनायां
वर्तंते तेषां [illegible] सा ग्रहीतृसमापत्तिरि
त्युच्यते तत्र भवित [illegible] वस्थाः शांतिक
निरूपतया वर्तिष्यते [illegible] स्यास्मिता गत उत्तरोत्तरावा
स्थाः इति चतुरवस्थो [illegible] समाधिः असंप्रज्ञातमा
ह विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः विरम्य
ते अनेनेति विरामः वितर्कादि चिंतात्यागः विरामश्चा

पा·सू· सोऽप्रत्ययश्चविरामप्रत्ययस्तस्याभ्यासः पौनःपुन्येनचे
८ तसिनिवेशनं तत्राभ्यासपरायत्तो हानिरुद्धसाति तस्यानेति
नेतिनैरंतर्येराणपुरुषेयस्य यत्नात्पूर्वः संप्रज्ञातसमाधिः
संस्कारावशेषोऽन्यः समा[illegible]तिरिणः असंप्रज्ञात इत्यर्थः
न तत्र किंचिद्वेद्यं संप्र[illegible]मसंप्रज्ञातो निर्वीजः
[illegible] व्युत्थानंस
माधिप्रारंभो निरोधः [illegible] क्षिप्तमूढचित्त
भूमी व्युत्थानं विक्षिप्त[illegible]भूमिः सत्त्वोद्रिक्तास
माधिप्रारंभः निरुद्धैका[illegible]तं पर्यंतभूमीप्राप्तिपरिणाम
मंचसंस्काराः तत्र व्यु[illegible]त्थानजनिताः संस्काराः समाधि
प्रारंभजैः संस्कारैर्ह[illegible]न्ते तेऽपि एकाग्रताजैः एकाग्र
ताजनिताः संस्[illegible]कारा निरोधजैः निरोधजाः संस्काराः
स्वयं च हन्यंते [illegible]व्यापारवत्संवलितं [illegible]

मात्मानं संस्कारसहितं चनिर्दहति एवमेकाग्रताजनि
तान्संस्कारान्निरोधजान्आत्मानं चनिर्दहति तेदे
वं योगस्य स्वरूपं भेदं संक्षेपरागोपायं योगाभ्यासं दर्शनिपू भा
र्वकमुपक्रमते भवप्रत्ययो विदेहप्रकृतिलयानां वि
देहाः प्रकृतिलयाश्चवि[illegible]दिप्रामिकाः सत्रेरागव्या
ख्याताः तेषां समाधिभ[illegible]ययः भवः संसारः सएव
प्रत्ययः कारणं यस्य स[illegible] अयमर्थः आ
विर्भूत[illegible]समाधिभाजो भवंति
तेषां परतत्त्वादर्शन[illegible]यं ततः परतत्त्व
तानेतद्भावनायां [illegible]नमहान्यत्नो विधेय
इत्यन्येन दर्थमुपा[illegible]योगिनां श्रद्धावीर्यस्मृ
तिसमाधिप्रज्ञापूर्वक इतरेषां विदेहप्रकृतिलयव्यति
रिक्तानां योगिनां श्रद्धादिपूर्वकः श्रद्धादयः पूर्वे उ

पा॰ सू॰ पायस्य सम्प्रज्ञादिः पूर्वकः तेच श्रद्धादयः क्रमादुपायो
६ पेयभावेन प्रवर्त्तमानाः [illegible] ज्ञातस्य समाधेरुपायतां
प्रतिपद्यन्ते तत्र श्र[illegible] यश्चेतसः प्रसादः वी
र्यमुत्साहः स्मृति[illegible]स्यासंप्रमोषः समाधि
रेकाग्रता प्रज्ञाप्रज्ञातन[illegible] श्रद्धावतो वीर्यं
जायते [illegible] ती सोत्साहस्य
[illegible]श्चात्यागभूमिषु स्मृ[illegible]यते तस्मात् वराग
च चेतसः समाधीयते स[illegible] चित्रप्रभाव्यं सम्य
क् विवेकेन जानाति [illegible] संप्रज्ञातस्य समाधेरुपा
या तस्याभ्यासात् परा[illegible]च्च वैराग्यात् भवत्यसंप्रज्ञातः
समाधिः उक्तोपायवतां योगिनां उपायभेदभेदानाह
तीव्रसंवेगानामासन्नः समाधिलाभः (समाधिफलं
च भवति) संवेगः क्रिया हेतुर्दृढतमः संस्कारः सती

त्रो येषामधिमात्रोपायानां तेषां समाधिलाभः ॥
समाधिफलं चासन्नं भवति शीघ्रमेव निष्पद्यत
इत्यर्थः केते तीव्रसंवेगा इत्याह मृदुमध्याधिमा॥
त्रत्वात्तोऽपि विशेषः [illegible] तेभ्य उपायो योऽमृद्वादिभेदभि
न्नेभ्य उपायवतां विशे[illegible]षो भवति मृदुर्मध्यः अधि
मात्र इत्युपायभेदाः ते[illegible] मृदुसंवेगमध्यसंवे
गतीव्रसंवेगभेदात् त्रि[illegible]योगिनो भ
वन्ति मृ[illegible]गः तीव्रसंवे
गश्च मध्योपायः [illegible]वेगः तीव्रसंवे
गश्च अधिमात्रोपा[illegible]संवेगः मध्यसंवेगः
तीव्रसंवेगश्च अधि[illegible]तीव्रे च संवेगे महान्यत्नः
कर्त्तव्यः इति भेदोपदेश[illegible]दुपायविलक्षणं सुगम
मुपायान्तरं दर्शयितुमाह ईश्वरप्रणिधानाद्वा ईश्वरो वक्ष्य

पा॰२॰ भाराणलक्षणाः प्रणिधानं तेनेश्वरो विशेषः विशिष्टमुपा
१० सनं सर्वक्रियाणामपि [illegible] विषयसुखादिकं फ
लमनिच्छुः सर्वास्तस्मिन्परमगुरावर्पयति तत्प्र
णिधानं समाधेस्तत्सफलमिति एषच प्रकृष्टउपायः ईश्वर
स्यप्रणिधानात्समा[illegible] तत्रेश्वरस्यल
मा [illegible]विनिरोपा[illegible] [illegible] फलं च क्रमे
भ्यउपायवतां वि[illegible] [illegible]ईश्वरो नाम स्वरूपः प्रत्यवि
[illegible]तु उपायभेदाः [illegible] अविद्यादयो वक्ष्यमा
णास्तीव्रसंवेगभेदा [illegible] मिश्ररूपाणि कर्माणि
विपि [illegible] कर्मफलानि जात्यायुर्भोगाः भो
गाः फलविपाकाः चित्तभूमौ शेरत इत्याशया वासना
ख्याः संस्काराः तैरपरामृष्टः त्रिष्वपि कालेषु नसंस्पृ
ष्टः पुरुषविशेषः अन्येभ्यः पुरुषेभ्यो विशिष्यत इ

ति विशेषः स ईश्वरः ईशनशीलः इच्छामात्रेण सकल
जगदुद्धरणक्षमः यद्यपि सर्वेषामात्मनां क्लेशादिस्पर
र्शो नास्ति तथापि चित्तगतस्तेषामौपचारिको यथा योधे
षु गतो जयपराजयो स्वामिनः अस्य तु त्रिष्वपि कालेषु
तथाविधोपि क्लेशा[illegible] संस्पर्शो नास्ति अतः सविल
क्षणो भगवानीश्वरः तस्य [illegible] विधमैश्वर्यमनादेः स
त्व[illegible] [illegible] [illegible]ज्ञानादेव न चानयो
[illegible] [illegible] [illegible]परस्परेण नपेक्षत्वा
[illegible]ज्ञानैश्वर्ययोः [illegible] [illegible] [illegible] तेन च
तथाविधेन सत्त्वेन तस्यानादिरेव सं[illegible] प्रकृतिपुरुषा
संयोगवियोगयोरीश्वरेच्छाव्यतिरेकेणानुपपत्तेः य
थेतरेषां प्राणिनां सुखदुःखमोहतया विपरिणतं चि
त्तं निर्मले सात्त्विके धर्मोपरक्ते प्रातिसंक्रान्तचिच्छाया

पा॰सू॰ संक्रान्तैः संवेद्यं भवति नैवमीश्वरस्य तस्य केवल एव
२२ सात्त्विकः परिणामः [illegible] उत्कर्षवाननादिसंबंधेनमोक्ष
तयाव्यवस्थितः अतः पुरुषांतरविलक्षणतयास
एवेश्वरः मुक्तानामनां पुनः क्लेशादियोगस्तैस्तैः शा
स्त्रोक्तैरुपायैर्निवि[illegible]देवतास्याविषयत्वा
[illegible]तीतानेकत्वं तेषांनु
त्पद्यमानत्वात् [illegible]
लत्वां मन्त्राभिप्रायित्वा[illegible]त्वानुपपत्तेः उत्कर्षा
पकर्षाउक्तेन हेतुनाना[illegible]भिवत्त्वे यद्युक्तो त्वेय एवोत्कृ
ष्टः स एवेश्वरः तस्यैव काष्ठाप्राप्तत्वादैश्वर्यस्य एवमी
श्वरस्य स्वरूपमभिधाय प्रमाणमाह तत्र निरतिशा
यं सर्वज्ञत्व बीजं तस्मिन् भगवति सर्वज्ञत्वस्य यद्बीज
मतीतानागतादिग्रहणस्याल्पत्वं महत्त्वं च मूलत्वा
द्बीजमिव बीजं तत्र निरतिशयं काष्ठाप्राप्तं दृष्टाहल्प

त्वमहत्त्वादीनां धर्माणां सातिशयानां काष्ठाप्राप्ति
र्यथा परमाणावल्पत्वस्याकाशे परममहत्त्वस्य
च एवं ज्ञानादयोऽपि चित्तधर्मास्तारतम्येन परिदृ
श्यमानाः क्वचिन्निरतिशयतामासादयन्ति यत्रैव
चैते निरतिशयाः स ई[illegible]ः कश्चापि सामान्यमात्रेण
मानस्य पर्यवसितत्वात्[illegible]विगतिः संभवति
तस्यापि श[illegible]शेषावगन्तव्याः
[illegible]नाभा[illegible]कथयोः संयोग
वियोगाभावात् पादयत्वानन्तनशकनीयं तस्य कारु
णिकत्वात् भूतानुग्रह एव प्रयोजनं कल्पप्रलयमहाप्रलये
षु निः शेषान् संसारिणः पुरुषानुद्धरिष्यामीति तस्याध्य
वसायः यद्यस्येष्टं तत्तस्य प्रयोजनमिति एवमीश्वरस्य
प्रमाणमभिधाय प्रभावमाह स एष पूर्वेषामपि गुरुः काले

पा॰ द्व नानवच्छेदात् आद्यानां स्रष्टॄणां ब्रह्मादीनामपि गुरुरु
१२ पदेष्टा यतः स कालेनानावच्छेदात् अनादित्वात् तेषां
पुनरादिमत्त्वादस्ति कालेन संबंधः एवंप्रभावमुक्त्वाउ
पासनोपयोगाय वाचकमाह तस्य वाचकः प्रणवः
२७ तस्योक्तस्वरूपेश्व [illegible] वाचकः प्रकर्षे
णनूयतेऽनेन [illegible] नमंतीति वा प्रणव
ओंकारः तयोश्च वाच्यवाचक [illegible] संबंधो नित्यः संकेते चावा
न प्रकाश्यते न तु केनापि [illegible] यथा पिता पुत्रयोः।
विद्यमानः संबंधोऽस्यायं पिता अस्यायं पुत्र इति केनचि
त्प्रकाश्यते उपासनमाह तज्जपस्तदर्थभावनं
तस्य सार्धत्रिमात्रस्य प्रणवस्य जपो यथावदुच्चारणं त॰२८
द्वाच्यस्येश्वरस्य भावनं पुनः पुनश्चेतसि निवेशनं ए
काग्रताया उपायः अतः समाधिसिद्धये योगिना प्र
सम्मा:

णवो जप्यस्तदर्थश्च भावनीय इत्युक्तं भवति उपा
सनायाः फलमाह ततः प्रत्यक्चेतनाधिगमोऽप्यंतर
रायाभावश्च तस्माज्जपात्तदर्थभावनाच्च योगिनः
प्रत्यक्चेतनाधिगमो भवति विषयप्रातिकूल्येन स्वा
मि॰ न्तःकरणाभिमुखमंचा [illegible] चेतना दृक्शक्तिः सा प्रत्य
क्चेतना तस्या अधिगमो [illegible] तं भवति अंतरायाश्च व
क्ष्यमाणास्तेषामभावः श [illegible] विंधो भवति अथ का
केंतरायाइत्याशं [illegible] ः व्याधिस्त्यानसंश
यप्रमादालस्याविरतिभ्रांतिदर्शनालब्धभूमिकत्वा
नवस्थितत्वानि चित्तविक्षेपास्तेंऽतरायाः नवैवैते र
जस्तामसबलात्प्रवर्तमानाश्चित्तस्य विक्षेपा भवंति तैरेका
ग्रताविरोधिभिश्चित्तं विक्षिप्यत इत्यर्थः तत्र व्याधिर्धा
तुवैषम्यनिमित्तो ज्वरातीसारादिः स्त्यानमकर्मण्य

पा०१ ताचित्तस्य उभयकोट्यालंबनंविज्ञानंसंशयः योगः
१५ स्याद्धानवेति प्रमादोऽनवधानशीलतासमाधिसाध
नेष्वौदासीन्यंआलस्यंकायचित्तयोर्गुरुत्वं योगविष
येप्रवृत्त्यभावहेतुः अविरतिश्चित्तस्यविषयसंप्रयोगा
त्मागर्द्धः भ्रांतिदर्श[illegible]तवद्विपर्ययज्ञा
नं अलब्धभूमिकत्वंकु[illegible]न्निमित्तात्समाधिभूमेर
लाभः असंप्राप्तिः अनव[illegible]तत्वंलब्धायामपिसमा
धिभूमौचित्तस्यतत्राप्रति[illegible]ष्ठा तएतेसमाधेरेकाग्रताा
याः यथायोगंप्रतिपक्षत्वादंतरायाइत्युच्यंते विक्षेप
कारणकानप्यन्यानंतरायान्प्रतिपादयितुमाह दुः
खदौर्मनस्यांगमेजयत्वश्वासप्रश्वासाविक्षेपसहभुवः
कुतश्चिन्निमित्तादुत्पन्नेषुविक्षेपेष्वेतेदुःखादयः
प्रवर्त्तंते तत्रदुःखंचित्तस्यराजसःपरिणामःबाधनाा १३

द:

लक्षणः यद्बाधात्प्राणिनस्तस्य पघातोपायेप्रवर्त्तंते
दौर्मनस्यंबाह्याभ्यंतरैःकारणैर्मनसोदौःस्थ्यं अंगमे
जयत्वंसर्वांगीणोवेपथुरासनस्थैर्यस्यबाधकः प्रा
णोयद्बाह्यंवायुमाचामतिसश्वासः यत्कौष्ठ्यंवायुंनिः
सारयतिसप्रश्वासः [illegible]तेविक्षेपैःसहप्रवर्त्तमानाः
यथोदितास्तएतेऽभ्यासवै[illegible]राग्याभ्यांनिरोद्धव्याइत्येषामु
पदेशः सोपद्रव[illegible]र्यमुपायांतरमाह
तत्प्रतिषेधार्थ[illegible] तेषांविक्षेपाणां
निषेधार्थमेकस्मिन्[illegible]भिमतेतत्त्वेअभ्यासश्चे
तसःपुनःपुनःनिवेशनंकुर्यात् यद्बलात्प्रत्यक्षोदितायां
एकाग्रतायांविक्षेपाःप्रशममुपयांति इदानींचित्तस्यसंस्का
रापादकंपरिकर्म्मकथयितुमाह मैत्रीकरुणामुदि
तोपेक्षाणांसुखदुःखपुण्यापुण्यविषयाणांभावनात

पा.सू. चित्तप्रसादनं मैत्रीसौहार्द्दं करुणा कृपा मुदिता हर्षः
२४ उपेक्षा उदासीन्यं एता यथाक्रमं सुखितेषु दुःखितेषु
पुण्यवत्सु अपुण्यवत्सु विभावयेत् तथाहि सुखि
तेषु साधु एषां सुखित्वमिति मैत्रीं कुर्यात् न त्वीर्ष्यां दुः
खितेषु कथं नु नाम [illegible] :स्यादिति कृपां
कुर्यात् न ताटस्थ्यं [illegible] पुण्यानुमोदनेन हर्षं कु
र्यात् न तु किमेते पुण्या[illegible] इति विद्वेषं अपुण्यवत्सु
च उदासीन्यमेव भावयेत् [illegible] मोदनं न द्वेषं सूत्रे सुखदुः
खादिशब्दैस्तद्वन्तः प्रति[illegible]दिताः तदेवं मैत्र्यादिपरिक
र्मणा चित्ते प्रसादति सुखेन समाधेराविर्भावो भव
ति परिकर्म चैतद्बाह्यं कर्म यथा च निजकालेना हन्त्या
प्रमाणराशिं फलेन परस्तकं लंतो यथा युति हत्तोस्य तत्ताः
मिश्रगुणौ मूलवृद्धि यत्रे मासेन पंचक शते मूलप

का:

लेखं च कर्विहीन शर्तं द्वयं वर्षै र्गतैः सखे किं मूलं किं
च तस्य फलं मिश्रकादि व्यवहार गणिते निष्पत्ति
ये संकलितादि कर्मोपकारकत्वेन प्रधानकर्मनिष्प
त्तये प्रभवति एवं रागद्वेषादिप्रतिपक्षभूतमैत्र्या
दिभावनया समुत्पा[illegible]प्रसादं चित्तं संप्रज्ञातादि
समाधियोग्यं संपद्यते [illegible]विवेकख्यातिया खेद
मुत्पादयतः तौ चेत्स[illegible]तौ स्यातां तदा प्रसे
न्नत्वात्मनसो भवत[illegible] उपायांतरमाह
प्रच्छर्दनविधारणाभ्यां वा प्राणस्य [illegible] प्रच्छर्दनं यत्को
ष्ठस्य वायोः प्रयत्नविशेषात्मात्राप्रमाणेन बहिर्नि
सारणं विधारणं मात्राप्रमाणेनैव प्राणस्यायामो
६५ गतिविच्छेदः स च बाह्याभ्यां प्रकाराभ्यां स्यां वा घंतर
पूरणेन पूरितस्य वा तत्रैव निरोधेन तदेवं रेचक पू

पा॰ सू॰
२५

रकत्वं भवनभेदेन त्रिविधः प्राणायामश्चित्तस्य स्थि-
तिमेकाग्रतायां निबध्नाति सर्वासामिंद्रियवृत्तीनां प्रा-
णपूर्वकत्वात्मनः प्राणयोश्च स्वस्वव्यापारे परस्प-
रमेकयोगक्षेम चात् जीयमानः प्राणः समस्तेंद्रिय
वृत्तिनिरोधद्वारेण [illegible] यासंभवति सम
स्तदोषक्षयकारित्वं [illegible] यते दोषकृताश्च
सर्वा विक्षेपवृत्तयः अ[illegible] धीनिर्हरणद्वारेणाप्य
स्यैकाग्रतायां सामर्थ्य[illegible] इयानीडपायांतरदर्शी
तोपद्ते पैरागसंप्रज्ञातस्य समाधेः पूर्वरंगं करोति वि
षयवती वा प्रवृत्तिरुत्पन्ना मनस्थितिनिबंधनी मनय इ
तिवाक्यशेषः विषया गंधरसरूपस्पर्शशब्दाः ते वि
द्यंते फलत्वेन यस्याः सा विषयवती प्रवृत्तिः मनसः स्थै
र्यं करोति तथा हि नासाग्रे चित्तं धारयतो दिव्यगंधसं

वित् प्रजायते ताद्दश्येव जिह्वाग्रे रससंवित् तालुनि रू-
पसंवित् जिह्वामध्ये स्पर्शसंवित् जिह्वामूले शब्दसंवित् इ-
त्येवं तत्तदिंद्रियद्वारेण तस्मिंस्तस्मिन्दिव्ये विषये
जायमाना संवित् चि[illegible]स्यैकाग्रताहेतुर्भवति अस्ति
योगस्य फलमिति यो[illegible]ः सामाश्वासोत्पादनात्
एवंविधमेवोपायांतरम[illegible] विशोका वा ज्योतिष्म
ती प्रवृत्तिरुत्पन्ना चि[illegible] निबंधनीति वाक्य
शेषः ज्योतिःशब्द[illegible]मुच्यते सप्रश-
स्तो भूयानतिशयवांश्च विद्यते यस्याः सा ज्योतिष्मती
प्रवृत्तिः विशोका विगतः सुखमय सत्त्वाभ्यास वशा-
च्छोको रजःपरिणामरूपो यस्याः सा विशोका चेतसः
स्थितिनिबंधनी अयमर्थः हृत्पद्मसंपुटमध्ये प्रशां-
तकल्लोलक्षीरोदधिप्रख्यं चित्तसत्त्वं भावयतः प्रज्ञा

पा॰वृ॰ लोकात्सर्वद्वत्तिपरिततयेचेतसः स्थैर्यमुत्पद्यते ऽ इदानीं
१८ उपायांतरप्रदर्शनद्वारेणसंप्रज्ञातस्यसमाधेर्विषयंदर्श
यति वीतरागविषयंवाचित्तं मनसः स्थितिनिबंधनंभ
वतीतिवाक्यशेषः वीतरागः परित्यक्तविषयालाव
स्तस्ययच्चित्तंपरि[illegible]कृतंचेतसः स्थि
तिहेतुर्भवति एवं[illegible]नांतरमाह स्वप्ननि
द्राज्ञानालंबनंवा प्रत्यस्त[illegible]वाह्येंद्रियवृत्तैर्मनोमात्रेणै
वयत्रभोक्तृत्वमात्मनः स[illegible]नः निद्रापूर्वमेवोक्तातद कलत्त
लंबनंस्वप्नालंबनंनि द्रालंबनंवाज्ञानमालंब्यमानाचे
तसः स्थितिंकरोति नानारुचित्वात्प्राणिनांयस्मिन्
कस्मिंश्चिद्वस्तुनियोगिनः श्रद्धाभवति तस्यध्यानेना
पिभवतीष्टसिद्धिरितिप्रतिपादयितुमाह यथाभि
मतध्यानाद्वा यथाभिमतेवस्तुनिवा बाह्येचंद्रादावाभ्यंतरे
ध्या

नाडीचक्रादौवाभाव्यमानेचेतः स्थिरीभवति एवमुपायां
यान्प्रदर्श्यफलमानार्थमाह (यथाभिमतध्याना
द्वा यथाभिमतेवस्तुनिवा बाह्येचंद्रादावाभ्यंतरेनाडीच
क्रादौवाभाव्यमाने[illegible]चेतः स्थिरीभवति एवमुपायां
तरप्रदर्श्यफलमा) परमाणुपरममहत्वांतोस्यावशीका
रः एभिरुपायैश्चित्तस्यस्थै[illegible]र्यंभावयतोयोगिनः सूक्ष्म
विषयभावनाद्वारेणप[illegible]वशीकारः अप्रतीघा
तरूपोजायते न[illegible]विषयेस्य
मनःप्रतिहन्यतइत्यर्थः एवंस्थूलमाकाशादिपरमम
हत्वपर्यंतंभावयतोनक्वचिच्चेतसः प्रतीघातउत्पद्यते
सर्वत्रस्वातंत्र्यंभवतीत्यर्थः एवमेभिरुपायैः संस्कृत
स्यचेतसः कीदृग्रूपंभवतीत्याह क्षीणवृत्तेरभिजात
स्येवमणेर्ग्रहीतृग्रहणग्राह्येषुतत्स्थतदंजनतासमाप

पा॰ सू॰ पत्तिः क्षीणाः स्ववृत्तयो यस्य तत् क्षीणवृत्ति तस्य
१७ ग्रहीतृग्रहणग्राह्येषु आत्मेन्द्रियविषयेषु तत्स्थ
तदञ्जनतापत्तिर्भवति तत्स्थत्वं तत्रैवैकाग्रता तदञ्ज
नत्वं तन्मयत्वं न्यग्भूते चित्ते विषयस्य भाव्यमान
स्यैवोत्कर्षस्तथा [illegible] रूपः परिणामो
भवतीत्यर्थः दृष्टा[illegible]जातस्यैवमणेरिति
यथाभिजातस्य निर्मलस्य [illegible]टकमणेस्तत्तदुपाश्रयव
शात्तत्तद्रूपापत्तिः एवं निर्मलस्य चित्तस्य तत्तद्भाव मत्व
नीयवस्तूपरागात्तत्तद्रूपतापत्तिः यद्यपि ग्रहीतृ
ग्रहणग्राह्येष्वित्युक्तं तथापि भूमिकाक्रमवशाद् ग्राह्यग्र
हणग्रहीतृष्विति बोद्धव्यं तत्र ग्राह्यनिष्ठ एव समा प्र
धिस्ततो ग्रहणनिष्ठस्ततोऽस्मितामात्ररूपो ग्रहीतृनिष्ठः
केवलस्य पुरुषस्य ग्रहीतुर्भाव्यत्वासंभवात् ततः

स्थूलसूक्ष्मग्राह्योपरक्तं चित्तं तत्र समापन्नं भवति ४१
एवं ग्रहणग्रहीत्रोरपि समापन्नत्वं बोद्धव्यं इदानीमुक्ता
या एव समापत्तेः [illegible]र्विधं भेदमाह शब्दार्थज्ञानवि
कल्पैः संकीर्णा स[illegible]र्का श्रोत्रेन्द्रियग्राह्यः स्फोटरू
पो वा शब्दः अर्थो जात्यादिः ज्ञानं सत्त्वप्रधाना बुद्धि
वृत्तिः विकल्प उक्तलक्षण[illegible]ः संकीर्णा यस्यामेते
शब्दादयः परस्पराध्या[illegible]भासन्ते गौरिति शब्दो
गौरित्यर्थो गौरि[illegible]कारेणासास
वितर्का समापत्तिरुच्यते उक्तलक्षण[illegible]विपरीतां निर
वितर्कामाह स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थ
मात्रनिर्भासा निर्वितर्का निर्विचारा एतयैव सविचारा शब्दार्थ
स्मृतिप्रविविषये मन्वादिनस्य ग्रहग्राह्याकार प्रतिभासितया
त्यगमन्त ताव ----२५---- निर्वितर्का समापत्तिः

पा.सू. भेदांतरंप्रतिपादयितुमाह चसूक्ष्मविषयाव्याख्याता
१८ एतयैवसवितर्कयानिर्वितर्कयाचसमापत्त्यासविचारा
निर्विचाराचव्याख्याता कीदृशीसूक्ष्मविषया सूक्ष्मस्त
न्मात्रेंद्रियादिविषयोयस्याःसातथोक्ता एतेनपूर्वस्या
स्थूलविषयत्वंप्रो [illegible] नहिमहाभूतालं
बना शब्दार्थविकल्पैः [illegible] कालधर्माद्यवच्छिन्नः
सूक्ष्मोर्थः प्रतिभातियस्यां [illegible] सासविचारा देशकालध
र्मादिरहितोधर्मिमात्रतयासूक्ष्मोर्थः तन्मात्रेंद्रियरूपः
प्रतिभातियस्यांसानिर्विचारा अस्याएवसूक्ष्मविषयायाः
किंपर्यंतं सूक्ष्मोविषय इत्याह सूक्ष्मविषयत्वंचालिं
गपर्यवसानं सविचारनिर्विचारयोःसमापत्त्योर्यत्सूक्ष्म
विषयत्वमुक्तंतदलिंगपर्यवसानंनक्वचिल्लीयते नवा
किंचिल्लिंगतिगमयतीत्यलिंगंप्रधानं तत्पर्यंतंसूक्ष्म

विषयत्वं तथाहि गुणानांपरिणामेचत्वारि पर्वाणि
विशिष्टलिंगमविशिष्टलिंगंलिंगमात्रमलिंगंचेति
विशिष्टलिंगंभूतानि अविशिष्टलिंगंतन्मात्रेंद्रि
याणि लिंगमात्रंबुद्धिरलिंगंप्रधानमिति नातःपरं
सूक्ष्ममस्तीत्युक्तं भवति एतासांसमापत्तीनांप्रकृतोपयो
जनमाह ताएवसबीजःसमाधिः ताएवोक्तलक्षणाःस समापः
माधिरुच्यते सहबीजेना [illegible] र्त्तनिरिति सबीजःसंप्रज्ञा सबीजः
तःसमाधिरित्युच्यते [illegible] त्वात् अथैतरा
सांसमापत्तीनांसाकारान्वफलत्वात् निर्विचारायाः
फलमाह निर्विचारवैशारद्येऽध्यात्मप्रसादः निर्विचा
रत्वंव्याख्यातं वैशारद्यमाह तस्याश्च सवितर्कोस्थूलविष
यामपेक्ष्यनिर्वितर्कायाः प्राधान्यं ततोपिसूक्ष्मविष
यायाःसविचारायाः ततोपिनिर्विकल्परूपायाद्वि

पा॰यू॰ विचारात्तस्याप्यपि निर्विचारस्य यः प्रकृष्टाभ्यासवशा
१९ द्वैशारद्ये नैर्मल्ये योगिनो वृत्तिका प्रसादनमुपजायते चि
त्तक्लेशवासनारहितमा[illegible] प्रवाहयोग्यं भवति एत
देवचित्तस्यवैशारद्ययो यस्याः प्रज्ञाहारद्वत्तस्मिन्सतिकिं
भवतीत्याह ऋतंभ[illegible] सत्यं बिभर्त्तिकदा
चिदपिनाविपर्ययेणा[illegible]त्रैव सा प्रज्ञा तस्मि
न्सति भवतीत्यर्थः तस्मा[illegible]प्रज्ञालोकात्सर्वं य
थावत्पश्यन्योगी प्रकृष्टं योगं प्राप्नोति अस्याः प्रज्ञां
तराद्वैलक्षण्यमाह श्रुतानुमानप्रज्ञाभ्यामन्यविष
या विशेषार्थत्वात् श्रुतमागमज्ञानं अनुमानमुक्त
लक्षणं ताभ्यां जायते प्रज्ञा सा सामान्यविषया नहि
शब्दलिंगयोरिंद्रियवद्विशेषप्रतिपत्तौ सामर्थ्यं इयंपु
नर्निर्विचारवैशारद्यसमुपेता प्रज्ञा ताभ्यां विलक्षणा

विशेषविषयत्वात् अस्यां च प्रज्ञायां सूक्ष्मव्यव
हितविप्रकृष्टानामपि विशेषः स्फुटेनैव रूपेण भा
सते अतस्तस्यामेव योगिना परः प्रयत्नः कर्तव्य इ
त्युपदिष्टं भवति अस्याः प्रज्ञायाः फलमाह तज्जः
संस्कारोन्यसंस्कार[illegible]
यः संस्कारः सोन्यान्संस्का[illegible]प्रतिबंधी तया प्रज्ञया जनितो
श्चसंस्कारान्प्रतिब[illegible]व्युत्थानजान्समाधिजां
त्यर्थः यतस्तत्त्वरूप[illegible]तमान्यकारानी
स्वरूपप्रज्ञाजनितान्संस्कारान्बाधितुं शक्नुवन्ति [illegible] अतस्तामेव
प्रज्ञामभ्यस्येदित्युक्तं भवति एवं संप्रज्ञातं समाधिमभि
धायासंप्रज्ञातं वक्तुमाह तस्यापि निरोधे सर्वनिरोधान्नि
र्बीजः समाधिः तस्यापि संप्रज्ञा[illegible]नस्य निरोधे प्रविलये स
ति सर्वासां चित्तवृत्तीनां स्वकारणे प्रविलयाद्या या संस्का

पा·सू· रमात्राद्वृत्तिरुदितिनस्यांतस्यांनेतिनेत्यातीति केवलं प
२· र्युदसनान्निर्वीजः समाधिराविर्भवति यस्मिन्सतिपुरुषः
स्वरूपमात्रप्रतिष्ठः शुद्धोभवति तदत्राधिकृतस्य योगस्य
लक्षणंचित्तवृत्तिनिरोधपदानांचव्याख्यानमभ्यासवै
राग्यलक्षणस्योपा[illegible]नं भेदंचाभिधायसंप्र
ज्ञातासंप्रज्ञातभेदेनयो[illegible]स्यमुख्यभेदमुक्त्वायो
गाभ्यासप्रदर्शनपूर्वकंवि[illegible]रेणोपायान्प्रदर्श्यसुग
मोपायप्रदर्शनपरतयाईश्वरस्यस्वरूपप्रमाणप्रभा
ववाचकोपासनाक्रमान्तत्फलानिनिर्णीयचित्तविक्षे
पांस्तत्सहभुवश्चदुःखादीन्विस्तरेणचतत्प्रतिषेधो ये
यानेकतत्त्वाभ्यासमैत्र्यादिप्राणायामादीन् संप्रज्ञाता
संप्रज्ञातपूर्वांगभूतान्विषयवतीप्रवृत्तिरित्यादीन्
संख्यायोपसंहारद्वारेणचसमापत्तीःसलक्षणाःफलाःस

हिताःस्वस्वविषयसहिताश्चोक्त्वा संप्रज्ञातासंप्रज्ञातयो
रुपसंहारमभिधायसवीजपूर्वकोनिर्वीजःसमाधिर
हित इतिव्याकृतोयोगपादः इतिश्रीमहाराजाधिराज
श्रीभोजदेवविरचितायांराजमार्तंडाभिधानायांपातंज
लयोगशास्त्रवृत्तौयोगपादःप्रथमः तेतेडुःप्राप्तयोग
र्द्धिसिद्धयेयेनदर्शिताः उपायाःसजगन्नाथस्त्र्यक्षोऽस्तु
प्रार्थिताप्तये तदेवंप्र[illegible]समाहितचित्तस्यसो
पायंयोगमभिधाय[illegible]स्यापिकथमुपाया
भ्यासपूर्वकोयोगःसात्म्यमुपयातीतितत्साधनानु
ष्ठानप्रतिपादनायक्रियायोगमाह तपःस्वाध्याये
श्वरप्रणिधानानिक्रियायोगः तपःशास्त्रांतरोपदिष्टं
कृच्छ्रचांद्रायणादिस्वाध्यायःप्रणवपूर्वाणांमंत्राणां
जपः ईश्वरप्रणिधानंसर्वक्रियाणांतस्मिन्परमगुरौ

फलानिरपेक्षतया समर्पणं एतानि क्रियायोग इत्युच्य
ते स किमर्थमित्याह समाधिभावनार्थः क्लेशत
नूकरणार्थश्च क्लेशा वक्ष्यमाणास्तेषां तनूकरणं स्व
कार्यकरणप्रतिबन्धः समाधिरुक्तलक्षणः तस्य भा
वना चेतसि पुनः पुनर्[illegible]प्रयोजनं यस्य
स तथोक्तः एतदुक्तं [illegible]यः प्रभवति योऽभ्य
स्यमानः शिथिलतां नाविद्यादीन् क्लेशान् शिथिलीकु
र्वन् समाधेरुपकारकतां भजते तस्मात्प्रथमतः कि
यायोगविधानपरेण योगिना भवितव्यमित्युपदि
ष्टं भवति क्लेशतनूकरणार्थ इत्युक्तं तत्र के क्लेशा इत्या
ह अविद्यास्मितारागद्वेषाभिनिवेशाः पंच क्लेशाः
अविद्यादयो वक्ष्यमाणलक्षणाः पंच ते बाधनालक्षणं
परितापमुपजनयन्तः क्लेशशब्दवाच्या भवन्ति ते हि चेतसि

सा

परिवर्तमानाः संस्कारलक्षणं गुणपरिणामं द्रढयन्ति
सत्स्वपि सर्वेषां तत्र क्लेशत्वे मूलभूतत्वादविद्यायाः प्रा
धान्यं प्रतिपादयितुमाह अविद्याक्षेत्रमुत्तरेषां प्रसुप्त
तनुविच्छिन्नोदाराणां अविद्या मोहः अनात्मन्यात्मा
भिमान इति यावत् सा क्षेत्रं प्रसवभूमिरुत्तरेषामस्मि
तादीनां प्रत्येकं प्रसुप्तादिभेदेन चतुर्विधानां अतो य
त्राविद्या विपर्ययज्ञानरू[illegible]ला भवति तत्र क्लेशा
नां रागादीनां नोद्भवे[illegible]यमानास्तत्रावच
नेषामङ्कुरवद्दर्शनात् प्रसुप्तास्तत्त्वलीनानां तु दग्धा
प्रवयोगिनां विच्छिन्नोदाररूपाश्च क्लेशा विषयसंगिनां
लक्षितमेव मूलत्वमविद्यायाः प्रसुप्ततनुविच्छिन्नोदारा
णामिति यत्र ये क्लेशाश्चित्तभूमौ स्थिताः प्रबोधकाभावे स्वकार्यं
नारभन्ते ते प्रसुप्ता इत्युच्यन्ते यथा बालावस्थायां बालस्य हि वा

पा.सू. सतात्रूपेणास्थिताः अपि क्लेशाः प्रबोधकसहकार्यभावे
२२ नाभिव्यज्यन्ते तनवः ये स्वप्रतिपक्षभावनया शिथिलीकृ
तकार्यसंपादनशक्तयो वासनावशेषतया चेतस्यवस्थि
ताः प्रभूतां सामग्रीमन्तरेण न स्वकार्यमारब्धुं क्षमाः यथा
भ्यासवतो योगिनस्त[illegible] केनचिद्बलवता
क्लेशेनाभिभूतशक्ति[illegible] यथा द्वेषावस्थायां रा
गः रागावस्थायां वा द्वेषः न [illegible] परस्परविरुद्धयोर्यु
गपत्संभवोस्ति उदाराः ये प्राप्तसहकारिसंनिधयः स्वं
स्वं कार्यमभिनिवर्तयन्ति यथा सदैव योगप्रौंथिनो व्यु त्तिपं
त्थानदशायां एषां प्रत्येकं चतुर्विधानामपि मूलभू
तत्वेन स्थिताप्यविद्यान्वयित्वेन प्रतीयते नहि क्वचि
दपि क्लेशानां विपर्यासान्वयनिरपेक्षाणां रूपमुपलभ्य
ते तस्यां च मिथ्यारूपायां सम्यग्ज्ञानेन निवर्तिता
तान

यां दग्धबीजकल्पानां एषां न क्वचित्प्ररोहोस्तीति अ
विद्यानिमित्तत्वमविद्यात्वयश्चैषां निश्चीयन्ते अतः
सर्वेप्यविद्याव्यपदेशभाजः सर्वेषां च क्लेशानां चित्त
विक्षेपकारित्वाद्योगिनां प्रथममेव तदुच्छेदे यत्नः
कर्तव्य इति अविद्यायालक्षणमाह अनित्याशु
चिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरवि
द्या अतस्मिंस्तदिति प्रति[illegible]इत्यविद्यायाः
सामान्यलक्षणम् [illegible] प्रतिपादनं अ
नित्येषु घटादिषु नित्यत्वाभिमानो अविद्येत्युच्यते
एवमशुचिषु कायादिषु शुचित्वाभिमानः दुःखे
षु च विषयेषु सुखाभिमानः अनात्मनि शरीरे आ
त्माभिमानः एतेनापुण्ये पुण्यभ्रमोनर्थे चार्थ
भ्रमो व्याख्यातः अस्मितालक्षणमाह दृग्दर्श

पा॰सू॰ नशक्त्योरेकात्मतेवास्मिता दृक्शक्तिः पुरुषः
२२ दर्शनशक्तिः रजस्तमोभ्यामनभिभूतः सात्त्विकः
परिणामोऽन्तःकरणरूपः तयोर्भोग्यभोक्तृत्वेन जडा
जडत्वेनात्यंतभिन्नरूपयोरेकताभिमानोऽस्मिते सू
त्युच्यते यथा प्रकृतौ [illegible] कर्तृत्वभोक्तृत्वरहिता
पि कर्त्र्यहं भोक्त्र्यहमित्यभि[illegible]न सोयमस्मि
ताख्यो विपर्यासः क्लेशः [illegible]स्य लक्षणमाह सु
खानुशयी रागः सुखमनुशेत इति सुखानुशयी
सुखज्ञस्य सुखानुस्मृतिपूर्वकः सुखसाधनेषु ७
तृष्णारूपो गर्धो रागसंज्ञकः क्लेशः द्वेषस्य लक्षणमाह
दुःखानुशयी द्वेषः दुःखस्वलक्षणानां तदनु
स्मृतिपूर्वकं तत्साधनेष्वनभिलषतो योऽयं निंदात्म
द्वेषलक्षणः क्लेशः अभिनिवेशमाह स्वरसवाही वि

दुषोपि तथारूढोऽभिनिवेशः पूर्वजन्मानुभूतम
रणदुःखानुभववासनाबलात् भयरूपः समुपजा
यमानः शरीरविषयादिभिर्मम वियोगो मा भूदित्य
न्वहमनुबंधरूपः सर्वस्यैवा कृमेर्ब्रह्मपर्यन्तं निमित्तं तदेवं
विना प्रवर्त्तमानोऽभिनिवेशाख्यः क्लेशः व्युत्थान
स्य क्लेशात्मकत्वादेकाग्रताभ्यासकामेन प्रथमं
क्लेशाः परिहर्त्तव्याः [illegible]तानां तेषां परिहारः
शक्यः कर्तुमिति ज्ञाना[illegible]द्देशं क्षेत्रं विभागं
लक्षणं चाभिधाय स्थूलसूक्ष्मभेदभिन्नानां तेषां
प्रहाणोपायविभागमाह ते प्रतिप्रसवहेयाः सू
क्ष्माः ते सूक्ष्माः क्लेशा ये वासनारूपेणैव स्थिताः न वृ
त्तिरूपं परिणाममारभन्ते ते प्रतिप्रसवेन प्रतिलोमपरिणामे
न हेयास्त्यक्तव्याः स्वकारणेऽस्मितायां कृतार्थं सवा

पा.वृ. सन्तं चित्तं यदा प्रविष्टं भवति तदा कृतास्तेषां निर्मूलानां
२४ संभवः स्थूलानां हानोपायमाह ध्यानहेयास्तद्वृत्तयः
तेषां क्लेशानामारब्धकार्याणां सुखदुःखमोहात्मि गां
काः वृत्तयस्ताः ध्यानेनैव चित्तैकाग्र्यलक्षणेन हे
याः हातव्या इत्यर्थः [illegible] अभ्यासमात्रेणैव
वस्थूलत्वात्तासां नि[illegible] यथा वस्त्रादेय
नः स्थूलो मलः प्रक्षालनमा[illegible]रेणैव निवर्तते यस्तु त त्रै
त्र सूक्ष्मः स तैः स्वरूपायैरुत्तापनप्रभृतिभिरेव नि
वर्तयितुं शक्यते एवं क्लेशानां तत्वमभिधाय क
र्माशयस्याभिधातुमाह क्लेशमूलः कर्माशयो दृ
ष्टादृष्टजन्मवेदनीयः आशय इत्यनेन तस्य स्वरूपम कर्म
भिहितं यतो वासनारूपाण्येव कर्माणि क्लेश
मूल इत्यनेन कारणमभिहितं यतः कर्मणां शुभा

शुभानां क्लेशा एव निमित्तं दृष्टादृष्टजन्मवेदनीय
इत्यनेन फलमुक्तं यस्मिन्नेव जन्मन्यनुभवनीयो
दृष्टवेदनीयः जन्मान्तरानुभवनीयो दृष्टवेदनीयः त जन्म
था हि कानिचित्पुण्यानि कर्माणि देवताराधनादी
नि तीव्रसंवेगेन कृतानि इहैव जन्मनि फलं जात्यायुर्भो
गलक्षणं प्रयच्छन्ति यथा नन्दीश्वरस्य भगवन्महेश्व
राराधनबलादिहैव ज[illegible]त्यायुर्भोगा विशिष्टाः प्रा
दुर्भूताः एवमन्येषां [illegible]तां तपः प्रभावात्
जात्यायुषी केषांचित्तु परिणाम एव तेषां तीव्रसंवेगेन दुष्ट
कर्मकृतां नहुषादीनां जात्यन्तरादिपरिणामः उर्व
श्याश्च कार्तिकेयवने लतारूपतया एवमदृष्टजन्मसम
लतारूपतया यथायोगं योज्यं इदानीं कर्माशयस्य
स्वभेदभिन्नं फलमाह सति मूले तद्विपाको जात्यायु

पा॰वृ॰ भोगाः मूलमुक्तलक्षणाः क्लेशाः तेष्वनभिभूतेषु
२५ तेषु सत्सु कर्म्मणां कुशलाकुशलरूपाणां विपाकः
भो फलं जात्यायुर्भोगा भवंति जातिर्मनुष्यत्वादि आयु
श्चिरकालं शरीरसंबंधः भोगाविषयाः इंद्रियाणि
सुखसंविद्धकर्म[illegible]व्यत्यासात्याभोग
शब्दस्ये इदमत्रतात्प[illegible]मोक्षपर्यंतकालं
संचिताः कर्म्मवासना[illegible]विपाकमुपयांति
तथा तत्प्रायणाख्यप्रभावेनाभिव्यक्ता जात्यायु
र्भोगालक्षणां स्वकार्यमारभंते उक्तानां कर्म्मफलत्वे नजात्यादी
नां स्वकारणाकर्म्मणि सम्बंधेन कार्यकर्तृत्वमाह ते ह्लादपरि
तापफलाः पुण्यापुण्यहेतुत्वात् ह्लादः सुखं परितापो दुः
खं ह्लादपरितापौ फलं येषां ते तथोक्ताः पुण्यं कुशलं कर्म्म
तद्विपरीतमपुण्यं ते पुण्यापुण्ये कारणं येषां तेषां

भावः तस्मात् एतदुक्तं भवति पुण्यकर्मारब्धा जात्यायु
र्भोगा ह्लादफलाः अपुण्यकर्मारब्धाः परितापफलाः
एतच्च प्राणिमात्रापेक्षया द्वैविध्यं योगिनस्तु सर्वं दुःख
मित्याह परिणामतापसंस्कारदुःखैर्गुणवृत्तिवि
रोधाच्च दुःखमेव सर्वं विवेकिनः परिज्ञानहेयत्वादि वि
वेकस्य परिहर्तव्यमा[illegible]मेव भोगसाधनं सविष
स्वादन्नवत् दुःखमेव प्र[illegible]कर्मणीयमित्यर्थः यस्मा
दत्यंताभिजा[illegible]पक्ष्मा छिज्जते यथा
क्षिपात्रसूत्राणि तु स्पर्शमात्रेणैव महतीं पीडामनु
भवंति नेतराणि तथा विवेकी स्वल्पदुःखानुबंधे
नापि विद्यते कर्म्यमित्याह परिणामतापसंस्का
रदुःखैर्विषयाणामुपभुज्यमानानां यथायथं गर्द्धा
भिवृद्धेस्तदप्राप्तिकृतस्य दुःखस्यापरिहार्यत्वात् दुःखा

पा०वृ० नरसाधनत्वाच्चास्त्येव दुःखरूपत्वेति परिणामदुःख
२६ त्वं उपभुज्यमानेषु सुखसाधनेषु तत्प्र[...]ध्यिनं प्र ति०
तिद्वेषस्य सर्वदैवावस्थितत्वात् सुखानुभवकाले
पितापदुःखं दुःखपरिहारमितितापदुःखता संस्का
रदुःखत्वं स्वकाभि[...]विषयसंनिधाने
सुखसंविद्दुःखसं[...]मानात्तथापि विषये
वसुखदेतेन संस्कारमारभन्ते संस्काराच्च पुनस्तथाविध
संविदनुभवः इत्यपरिमितसंस्कारोत्पत्तिद्वारेण संसा
रानुच्छेदात्सर्वस्यैव दुःखत्वं गुणवृत्तिविरोधाच्चेति
गुणानां सत्वरजस्तमसां याः वृत्तयः सुखदुःखमोह
रूपाः परस्परमभिभाव्याभिभावकत्वेन विरोधाज्जायं
ते सर्वासां सर्वत्रैव दुःखानुवेधात् दुःखत्वं एतदुक्तं
भवति ऐकान्तिकीमात्यन्तिकीं च दुःखनिवृत्तिमि

च्छतो विवेकिन उक्तरूपकारणचतुष्टयं यावत्सर्वे वि
षया दुःखरूपतया प्रतिभान्ति तस्मात्सर्वकर्मविपाको
दुःखरूप एवेत्युक्तं भवति तदेवमुक्तस्य क्लेशकर्मा
शयविपाकराशेरविद्याप्रभवत्वादविद्यायाश्च मिथ्या
ज्ञानरूपतया सम्यग्ज्ञानोच्छेद्यत्वात्सम्यग्ज्ञानस्य
च सा साधनं हेयोपादेय[...]रूपत्वात्तदभिधाना
याह हेयं दुःखमनागतम् [...]निकान्तत्वादनुभूय
मानस्य च[...]भवेद्यत्संसारदुःखं
हानव्यमित्युक्तं भवति हेयहेतुमाह द्र[...]योः संयो दृष्टृ
गो हेयहेतुः द्रष्टा चिद्रूपः पुरुषः दृश्यं बुद्धितत्त्वं तयो
रविवेकख्यातिपूर्वको योऽसौ संयोगो भोग्यभोक्तृत्वे
न संनिधानं स एव दृश्यस्य दुःखस्य गुणपरिणामरूपस्य सं
सारस्य हेतुः कारणम् तन्निवृत्त्या संसारनिवृत्तिर्भव

पा॰ द्वि॰ २२ तीत्यर्थः द्रष्टृदृश्ययोः संयोग इत्युक्तं तत्र दृश्यस्य स्व
रूपं कार्यं प्रयोजनं चाह प्रकाशक्रियास्थितिशीलं
भूतेन्द्रियात्मकं भोगापवर्गार्थं दृश्यं प्रकाशः सत्वस्य
धर्मः क्रियाप्रवृत्तिरूपा रजसः स्थितिर्नियमरूपा त
मसः ताः प्रकाश[illegible]: शीलं स्वाभावि
कं स्वरूपं यस्य तत्तथा [illegible] भूतें
न्द्रियात्मकमिति भूतानि स्थूलसूक्ष्मभेदेन पृथिव्यादीनि
गन्धतन्मात्रादीनि च इन्द्रियाणि बुद्धीन्द्रियकर्मेन्द्रियान्तः
करणभेदेन त्रिविधानि [illegible] उभयमेतद् ग्राह्यग्रहणरूपमा
त्मा स्वरूपाभिन्नः परिणामो यस्य तत्तथाविधमिति
भेदेनैतेन कार्यम[illegible]युक्तं भोगः कथितलक्षणः अप
वर्गो विवेकख्यातिपूर्विका संसारनिवृत्तिः तौ भोगा
पवर्गावर्थः प्रयोजनं यस्य तत्तथाविधं दृश्यमित्यर्थः

तस्य च दृश्यस्य नानावस्थारूपपरिणामात्मक
स्य हेयत्वेन ज्ञातव्यत्वादवस्थाः कथयितुमाह वि
शेषाविशेषलिङ्गमात्रालिङ्गानि गुणपर्वाणि गु
णानां पर्वाण्यवस्थाविशेषाश्चत्वारो ज्ञातव्या इ
त्युपदिष्टं भवति त[illegible] विशेषा महाभूतेन्द्रियाणि अवि
शेषास्तन्मात्रान्तःकरणानि लिङ्गमात्रं बुद्धिः अलिङ्गम
व्यक्तमिति तत्र सर्वत्र [illegible]
त्वेन तत्र [illegible] पुरुषाव्यक्तमन्वयि
प न चत्वारि [illegible] एवं दृश्यस्य [illegible]णकाले
प्रपञ्चं ज्ञातव्यत्वात् तदवस्थासा हि ते व्याख्याय योपा
देयं द्रष्टारं व्याकर्तुमाह द्रष्टा दृशिमात्रः शुद्धोऽपि प्र
त्ययानुपश्यः द्रष्टा दृशिमात्रः चेतनामात्रः मात्र
ग्रहणं धर्मधर्मिनिराकरणार्थं केचिद्धि चैतन्यमात्म

त्मनो

पा·वृ· नोधर्ममिषंति सशुद्धोपिपरिणामित्वाद्यभावेनस्वप्र भा
२८ तिष्ठोपिप्रत्ययानुपश्यः प्रत्ययाविषयोपरक्तानि
ज्ञानानि तान्यव्यवधानेनप्रतिसंक्रमाद्यभावेन
चपश्यति एतदुक्तंभवति जातविषयोपरागाया
मेवबुद्धौसन्निधि[illegible]दृष्टृत्वमिति
सएववास्यभोक्ता[illegible]र्थएवदृश्यस्यात्मा
दृश्यस्यप्रागुक्तलक्षणस्य[illegible]यत्स्वात्मायत्स्वरूपं
सतदर्थः तस्यपुरुषस्यभोक्तृत्वप्रतिपादनेना
मस्वार्थपरिहारेणप्रयोजनं नहिप्रधानंप्रवर्त्तमा
नमात्मनः किंचित्प्रयोजनमपेक्ष्यप्रवर्त्ततेकिंतु
पुरुषस्यभोगंसंपादयामीति यद्येवंपुरुषस्यभो
गसंपादनमेवप्रयोजनं तदासंपादितेतस्मिंस्त
त्रिः प्रयोजनविरतव्यापारंस्यात् तस्मिन्परिणाम

शून्येशुद्धत्वात्सर्वेद्रष्टारोबंधरहिताःस्युः ततश्चसं
सारोच्छेद इत्याशंक्याह कृतार्थंप्रतिनष्टमप्यनष्टं
तदन्यसाधारणत्वात् यद्यपिविवेकख्यातिपर्यंता
द्भोगसंपादनात्कमपिकृतार्थंपुरुषंप्रतितन्नष्टं
पा· विरतव्यापारंतथापिसर्वपुरुषसाधारणत्वादन्याप्र
त्यनष्टंसव्यापारमवतिष्ठते अतःप्रधानस्यसक
लभोक्तृसाधारणत्वान्न[illegible]दापिविनाशः एकस्य
मुक्तौनसर्वेषां[illegible]ति दृश्यद्रष्टारौ
व्याख्यायसंयो[illegible]विधौ स्वामिशक्त्योःस्व
रूपोपलब्धिहेतुःसंयोगःकार्यद्वारेणास्यलक्षणंका
रोति स्वशक्तिःस्वभावः स्वामिशक्तिःद्रष्टुःस्व
रूपं तयोर्द्वयोरपिसंवेद्यसंवेदकत्वेनव्यवस्थित
योर्यास्वरूपोपलब्धिः तस्याःकारणंयःससंयोगः

पा॰ वृ॰ सचसहजभोग्यभोक्तृत्वभावोस्माभिस्त्वान्योन्नहितयो
२९ र्नित्ययोर्व्यापकयोरपिपुरुषप्रधानयोरतिरिक्तःकश्चित्संयो
गः यदेवभोग्यस्यप्रधानेभोक्तृत्वस्यभोक्तृत्वंचअनादि
सिद्धसंएवसंयोगउक्तंभवति ज्ञानावस्माह तस्यहेतु
रविद्यायापूर्वंवि[illegible]स्वरूपास्मविद्याव्या
ख्यातासातस्यविवेक[illegible]विस्यसंयोगस्यका
रणं हेयंदुःखमनागतं[illegible]कं हेयहन्त्क्रियाको
मोच्यते किंपुनस्तद्धानमित्याह तदभावात्संयोगा
भावोहानंतदृशेःकैवल्यं तस्याअविद्यायाःस्वरू
पविरुद्धेनसम्यक्ज्ञानेनोन्मूलितायायोयमभावस्त
स्मिन्सतितत्कार्यस्यसंयोगस्याप्यभावःतद्धानमि
त्युच्यते अयमर्थोनेनस्यमूर्त्तदुस्यवत्यागरित्यागोप्युच्य
ते किंतुजातायांविवेकख्यातावविवेकाविवेके सं
निमित्तः

योगःस्वयमेवविवर्त्तते इतितस्यहानं यदेवचसंयो
गस्यहानंतदेवनित्यंकैवल्यस्यापिपुरुषस्यकैवल्य
व्यपदिश्यते तदेवंसंयोगस्यस्वरूपंकारणंकार्यं
चाभिहितं अथहानोपायकथनद्वारेणोपादेय ६।
कारणमाहविवेकख्यातिरविप्लवाहानोपायः
अन्यः॰ अन्येगुणाःअन्यःपुरुषइत्येवंविधस्यविवेकस्य
याख्यातिःप्रत्ययः[illegible]स्यपरिहायस्यउपायः
कारणं कीदृशी[illegible]यदिविप्लवोविच्छे
दो तदाप्रतिप[illegible]धाप्रविलयविनि
वर्त्तनात्वचकोत्[illegible]यारजस्तमोमलनिर्मल
याबुद्धेर मुखायान्तरा साविवेकख्यातिरित्युच्यते त
स्याचसंतननत्वेभवतायांदृश्याधिकारनिवृत्तेर्भवत्ये
वकैवल्यं इष्यन्नाविवेकख्या[illegible]रुषस्यपदृशी

पा॰२॰ प्रज्ञाभवतित्येकेप्ययत्नाविवेकख्यातेरेवस्वरूप
२७ माह तस्यसप्तधाप्रान्तभूमिःप्रज्ञा तस्योत्पन्नविवेक
ज्ञानस्यज्ञातव्यविवेकस्वरूपाप्रज्ञाप्रान्तभूमौसक
लसालंबनसमुद्भिक्तभवति निसप्तप्रकाराभवति
तत्रकार्यविमुक्तिः [illegible] ज्ञातंमयाहे
यन्नज्ञातव्यंकिंचिद [illegible] मेक्लेशाःनक्षेतव्य
मेकिंचिदस्ति अधिगतं मयाहानं प्राप्तंमयावि
वेकख्यातिरिति प्रत्ययान्तरपरिहारेणतस्यामव
स्थायामीदृश्येवप्रज्ञाजायते ईदृशीप्रज्ञाकार्यविष
यानिर्मलंज्ञानंकार्यविमुक्तिरित्युच्यते चित्तविमु
क्तिस्त्रिधा चरिताधिकाराबुद्धिः गुणाःकृताधिकाराः
गिरिशिखरनिपतिताइवग्रावाणोनवस्थानः स्थितिं
यास्यन्तीति स्वकारणेप्रलयाभिमुखानांमोहाभि

यं
धानमूलकारणाभावान्निःप्रयोजनत्वाच्चामीषांकु
तःप्ररोहः सात्मीभूतश्चमेसमाधिः तस्मिन्सतिस्वरू
पप्रतिष्ठोहमितीदृशीत्रिःप्रकाराचित्तविमुक्तिःत
देवमीदृश्यांसप्तविधप्रान्तभूमिप्रज्ञायामनुपजातायां
पुरुषःकुशलइत्युच्यते विवेकख्यातिःसंयोगा
भावहेतुःइत्युक्तं तस्याःउत्पत्तौकिंनिमित्तमित्याह नि
योगाङ्गानुष्ठानादशुद्धिक्षयेज्ञानदीप्तिराविवेकख्या २८
तेः योगाङ्गानि [illegible] ष्ठानाज्ज्ञानद
र्वकादभ्यासादशुद्धि [illegible] विनासत्वस्यप्र
काशावरणलक्षणा [illegible] थाज्ञानादीप्तिरता
रतम्येनसात्विकःपरिणामोविवेकख्यातिपर्यन्तःसमस्याः
ख्यातेर्हेतुरित्यर्थः योगाङ्गानुष्ठानादशुद्धिक्षयइ
त्युक्तं कानिपुनस्तानियोगाङ्गानीतितेषामुद्देशमा

पा·२ः ह यमनियमासनप्राणायामप्रत्याहारधारणाध्या
३१ नसमाधयोऽष्टावंगानि इह कानिचित्समाधेः साक्षा
दुपकारकत्वेनांतरंगाणि यथा धारणादीनि कानि
चित्प्रतिपक्षभूतहिंसादिवितर्कोन्मूलनद्वारेण स ॥ दि
माधिमुपकुर्वंति [illegible] यमनियमादयः तत्रासनादी
नामुत्तरोत्तरमुपकारकत्वं [illegible] सत्यासनजये प्रा
णायामस्थैर्यमेवमुत्तर[illegible]योज्यं क्रमेणैषां स्वरूप
माह अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः त
त्राहिंसा प्राणवियोगप्रयोजनो व्यापारः स च सर्वान
र्थहेतुः तदभावोऽहिंसा हिंसायाः सर्वप्रकारेणैव परि
हार्यत्वात्प्रथमं तदभावरूपाया अहिंसाया निर्देशः
सत्यं वाङ्मनसयोर्यथार्थत्वं स्तेयं परस्वापहरणं
तदभावोऽस्तेयं ब्रह्मचर्यमुपस्थस्य संयमः अपरिग्रहो
ते

भोगसाधनानामस्वीकारः त एतेऽहिंसादयः पंच
यमशब्दवाच्याः योगांगत्वेन निर्दिष्टाः तेषां विशे
षमाह जातिदेशकालसमयानवच्छिन्नाः सार्वभौ
मा महाव्रतं जातिर्ब्राह्मणत्वादिः देशस्तीर्थादिः
कालश्चतुर्दश्यादिः समयो ब्राह्मणप्रयोजनादिः
एतैश्चतुर्भिरनवच्छिन्ना अहिंसादयो यमाः सर्वा
सु क्षिप्तादिषु चित्तभूमिषु [illegible] महाव्रतमित्युच्यते न
[illegible] न कंचन हनिष्या
मि चतुर्दश्यां [illegible] ब्राह्मणप्रयोजनव्यति
रेकेण [illegible] चतुर्विधावच्छेद
व्यतिरेकेण कंचित्क्वचित्कदाचित्कस्मिंश्चिदर्थे न ह
सान्य- निष्यामीत्यनवच्छिन्नाः एवं सत्यादिषु यथायोगं यो
ज्यं इत्थमनियतीकृताः सामान्येनैव प्रवृत्ता महा

पा.२. व्रतमित्युच्यते न पुनः परकीयास्थावरादिधारणं नि
३२ यमानाह शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधा
नानि नियमाः शौचं द्विविधं बाह्यमाभ्यंतरं च बा
ह्यं मृज्जलादिनिर्वृत्तमाभ्यंतरं मैत्र्यादिभि
श्चित्तमलानां [illegible] मः शेषाः प्रागेवा
क्तव्याख्यानाः [illegible] नियमशब्दवाच्याः
कथमेषां योगांगत्वमि [illegible] वितर्कबाधने प्रतिपक्ष
भावनं वितर्का इति विनिबुद्ध्य योगपरिपंथिनो हिं
सादयः तेषां प्रतिपक्षभावने सति यदा बाधा भवति
तदा योगस्यकरो भवति इति भवत्येव यमनियमानां
योगांगत्वं इदानीं वितर्काणां स्वरूपं भेदप्रकारं का
रणं फलं च क्रमेणाह वितर्का हिंसादयः कृतकारि
तानुमोदिता लोभक्रोधमोहपूर्वका मृदुमध्याधि

मात्राः दुःखाज्ञानानंतफला इति प्रतिपक्षभावनं एते पूर्वोक्ता हिं
सादयः प्रथमं त्रिधाभिधीयंते कृतकारितानुमोदनभेदेन त
त्र स्वयं निष्पादिताः कृताः कुरु कुर्विति प्रयोजकव्यापा
रे समुत्पादिताः कारिताः अन्येन क्रियमाणाः साधि
त्यंगीकृता अनुमोदिताः एतत्त्रैविध्यं परस्परमाह नि
वारणायोच्यते अन्यथाभेदमानि एवमन्येनेन मया स्व
यं हिंसा कृतेति [illegible] इति एतेषां कारणप्रति
पादनाय [illegible] यद्यपि लोभः प्र
थमं निर्दिष्टः [illegible] स्यात्तथाप्य
नादिमान [illegible] स्मिन्संसारे स्वप
रविभागः सर्वे [illegible] लोभक्रो [illegible] दीनां समुद्भवात्मूलत्वम
स्येयं मोहः सर्वेषां सर्वदोषाणां जननीति [illegible] लोभस्तृ
ष्णा लोभः कृत्याकृत्यविवेकोन्मूलकः ज्वलनात्मका चि
क्रोध

पा॰ २॰ त्र धर्माः प्रत्येकं कृतादिभेदेन त्रिप्रकारा अपि हिंसा
३२ दयो मोहान्तं [illegible] [illegible] आभिधीयंते एषामेव
नेदवस्थाभेद [illegible] शौचादि [illegible] माह मृदुमध्याधिमात्राः
मृदवो मंदाः [illegible] [illegible] मध्याः अधिमा
त्राः तीव्राः [illegible] [illegible] पुनर्विधाः सप्तविं
५ सप्तविंश [illegible] [illegible] प्रत्येकं मृदुमध्या
धिमात्रभेदात् त्रैविध्यसंभवात् तद्यथा योगं योज्यं
तद्यथा मृदुमृदुः मृदुमध्यो मृदुतीव्र इति एषां फ
लमाह दुःखाज्ञानानंतफलाः दुःखं प्रतिकूलतयाव
भासमानो राजसश्चित्तधर्मः अज्ञानं मिथ्याज्ञानं सं
शयविपर्ययादिरूपं ते दुःखाज्ञाने अनन्तमपरिच्छि
न्नं फलं येषां ते न यो ज्ञाः इत्थं तेषां स्वरूपकारणादि
भेदेन ज्ञातानां प्रतिपक्षभावनया योगिना परिहारः

३

कर्त्तव्यः इत्युपदिष्टं भवति एषामभ्यासात्प्रक
र्षं गच्छतामनुनिष्पादितः सिद्धयो यथा भवंति तथा
क्रमेण प्रतिपादयितुमाह तत्सन्निधौ वैरत्यागः
तस्याहिंसां भावयतः सन्निधौ सहजविरोधिनामप्य
हिनकुलादीनां वैरत्यागो निर्मत्सरतयावस्थानं भ
वति हिंसारता अपि हिंस्रत्वं परित्यजंतीत्यर्थः सत्याभ्या
ह सवतः किं भवतीत्याह [illegible] क्रियाफलाश्रयत्वं क्रिय
माणा हि क्रिया यागादिकाः [illegible] फलं स्वर्गादिकं प्रयच्छं
ति अस्य तु [illegible] [illegible] [illegible] तथा सत्याभ्यासवतः
कुर्वतो यस्मात् [illegible] [illegible] [illegible] क्रियाफलमा
प्नुयात् तद्वचनात् [illegible] क्रियामकुर्वतोपि
१२ फलं भवतीत्यर्थः अस्तेयाभ्यासवतः फलमाह अ
पा॰ ६ स्तेये सर्वरत्नोपस्थानं अस्तेयं यदा अभ्यस्यति तदास्य

पा.सू. तत्प्रकर्षान्निरभिलाषस्यापि सर्वतोदिक्कानिर
३४ त्नान्युपतिष्ठंति ब्रह्मचर्याभ्यासस्य फलमाह
ब्रह्मचर्यप्रतिः शौचांवीर्यलाभः यः किल ब्रह्मचर्य
मभ्यस्यति तस्य तत्प्रकर्षान्निरतिशयं वीर्यं साम
र्थ्यमाविर्भवति [illegible] तस्य
प्रबाधाः शरीरा[illegible] केषमागच्छति अ
परिग्रहाभ्यासस्य फलमाह अपरिग्रहस्थैर्ये जन्म
कथंतासंबोधः कथमित्यस्य भावः कथंता जन्म
नः कथंता जन्मकथंता तस्याः संबोधः सम्य
ग्ज्ञानं जन्मांतरे कोऽहमासं कीदृशः किंकार्यकारीति जि
ज्ञासायां सर्वमेव सम्यग्जानातीत्यर्थः नकेवलं भो
गसाधनपरित्रिन्ह एव परिग्रहः यावदात्मनः शरीर
परिग्रहोपि परिग्रहः भोगसाधनत्वाच्छरीरस्य तस्मिन्स
ग्र परि

त्निरागानुबंधाद्बहिर्मुखायामेव प्रवृत्तौ न सात्त्विक
ज्ञानप्रादुर्भावः यदा पुनः शरीरादिपरिग्रहनैरपेक्ष
दामाध्य स्थ रागमाध्यस्थ्यमवलंबते तेन तस्य रागादित्यागात्सम्यक
ज्ञानहेतुर्भवत्येव पूर्वापरजन्मसंबोधः उक्ता य
मानां सिद्धयः नियमानामाह शौचात्स्वांगजुगुप्सा
परैरसंसर्गः यः शौचं भावयति तस्य स्वांगेष्वपि कार
णात्स्वरूपपर्यालोचनद्वारेण जुगुप्सा घृणा समुपजा
यते । अस्मात्किं [illegible] नैवास्मीति अमु
नैव हेतुना [illegible] संपर्का
भावः परिव[illegible]
दर्श गुप्सा तेन [illegible] लमेकका यनु
वैः संसर्गमनुभवता [illegible] सत्यं प्रकारमाह (द्विवि
धस्यापि शौचस्य [illegible] फलं) सत्त्वशुद्धि सौमनस्य

पा॰ २॰ काग्र्येंद्रियजयात्मदर्शनयोग्यत्वानि च भवंतीति
३५ वाक्यशेषः [illegible] त्मकं तस्याशु
द्धिरितिमेवेजये शौचं [illegible]लाभः यः प्रकृष्यमाणो
योगिन इष्ट [illegible] संप्रयोगो भवति
सदेवता प्रत्य [illegible] ध्यानस्य
फलमाह [illegible] भवः
सौमनस्यं खेदाननु[illegible]नेन मानसा प्रीतिः एकाग्र
तानियतविषये चेतसः स्थैर्यं इंद्रियजयो विषय
पराङ्मुखानामिंद्रियाणां स्वात्मन्यवस्थानं आ
त्मदर्शने विवेकख्यातिरूपे चित्तस्य योग्यत्वं सम
र्थत्वं शौचाभ्यासवत एते समुन्मीलंतः क्रमे
ण प्रादुर्भवंति यथा हि सत्वशुद्धिः सौमनस्यं सौ
मनस्यादेकाग्र्यं ऐकाग्र्यादिंद्रियजयः इंद्रियजया

दात्मदर्शनयोग्यतेति संतोषाभ्यासस्य फलमा
ह संतोषादनुत्तमः सुखलाभः संतोषप्रकर्षेण
योगिनस्तथाविधमांतरं सुखमाविर्भवति यस्य
बाह्यं विषयसुखं शतांशेनापि न [illegible] तपसः फलमाह
कायेंद्रियसिद्धिरशुद्धिक्षयात्तपसः तपः समभ्यस्यमानं
चेतसः क्लेशादिलक्षणाशुद्धिक्षयद्वारेण कायेंद्रिया
णां सिद्धिमुत्कर्षमादधाति अयमर्थः चांद्रायणा
दिना चित्त[illegible] सिद्धिः सूक्ष्मव्य
वहितविप्रकृष्ट [illegible] भवति का
यस्य यथेच्छ[illegible] स्वाध्यायस्य फ
लमाह स्वाध्यायादिष्टदेवतासंप्रयोगः अभिप्रेत
मंत्रजपादिलक्षणे स्वाध्याये प्रकृष्यमाणे योगि
न इष्टयाभिप्रेतया देवतया संप्रयोगो भवति सा हि

